# Dharmadevakrita Shri Hari Stuti

# ધર્મદેવકૃતા શ્રીહરિસ્તુતિઃ ૧

## Document Information

Text title : Dharmadevakrita Shri Hari Stuti

File name : dharmadevakRRitAshrIharistutiH.itx

Category : vishhnu, svAminArAyaNa, krishna, stuti, aShTaka

Location : doc_vishhnu

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# ધર્મદેવકૃતા શ્રીહરિસ્તુતિઃ ૧

(શિખરિણી)

મહિમ્નસ્તે પારં વિધિહરફણીન્દ્રપ્રભૃતયો
વિદુર્નાદ્ધાપ્યજ્ઞશ્ચલમતિરહં નાથ નુ કથમ્ ।
વિજાનીયામદ્ધા નલિનનયનાત્મીયવચસો
વિશુદ્ધ્યૈ વક્ષ્યામીષદપિ તુ તથાપિ સ્વમતિતઃ ॥ ૧॥

યદાહુર્બ્રહ્મકે પુરુષમિતરે કર્મ ચ પરે ।
પરે બુદ્ધં ચાન્યે શિવમપિ ચ ધાતારમપરે ।
તથા શક્તિં કેચિદ્ ગણપતિમુતાર્કં ચ સુધિયો
મતીનાં વૈ ભેદાત્ત્વમસિ તદશેષં મમ મતિઃ ॥ ૨॥

શિવોઽહં રુદ્રાણામહમમરરાજો દિવિષદાં
મુનીનાં વ્યાસોઽહં હરિવર સમુદ્રોઽસ્મિ સરસામ્ ।
કુબેરો યક્ષાણામિતિ તવ વચો મન્દમતયે
ન જાને તજ્જાતં જગતિ નનુ યન્નાસ્યભયદ ॥ ૩॥

ક્વચિન્મત્સ્યઃ કૂર્મઃ ક્વચિદપિ વરાહો નરહરિઃ
ક્વચિત્ ખર્વો રામો દશરથસુતો નન્દતનયઃ ।
ક્વચિદ્ બુદ્ધઃ કલ્કિર્વિહરસિ કુમારાપહૃતયે
સ્વતન્ત્રોઽજો નિત્યો વિભુરપિ તવાક્રીડનમિદમ્ ॥ ૪॥

તવાદેશં કૃત્વા શિરસિ ભગવઁશ્ચાક્ષરમુખા
વૃષા નસ્સુ પ્રોતા ઇવ કૃષિકૃતશ્ચૈવ સભયં ।
પ્રવર્તન્તે સૃષ્ટેર્જનિભરણનાશાર્થમનિશં
ત્વમેવૈકઃ સ્વામી સકલજગતાં કોઽપિ ન પરઃ ॥ ૫॥

કણાન્ કશ્ચિદ્ વૃષ્ટેર્ગણનનિપુણસ્તૂર્ણમવને-
સ્તથાઽશેષાન્ પાંસૂનમિત કલયેચ્ચાપિ તુ જનઃ ।
નભઃ પિણ્ડીકુર્યાદચિરમપિ ચેચ્ચર્મવદિદં

તથાપીશાસૌ તે કલયિતુમલં નાખિલગુણાન્ ॥ ૬॥

સુધાપાનં જ્ઞાનં ન ચ વિપુલદાનં ન નિગમો
નયાગો નો યોગો ન ચ નિખિલ ભોગોપરમણમ્ ।
જપો નો નો તીર્થં વ્રતમપિ ચ નોગ્રં ત્વિહ તપો
વિના ભક્તિં તેડલં ભવભયવિનાશાય ભગવન્ ॥ ૭॥

નમઃ સર્વેષ્ટાય શ્રુતિશિખરદૃષ્ટાય ચ નમો
નમોડસંશ્લિષ્ટાય ત્રિભુવનનિવિષ્ટાય ચ નમઃ ।
નમો વિસ્પષ્ટાય પ્રણવપરિમૃષ્ટાય ચ નમો
નમસ્તે સર્વાત્મન્ પુનરપિ પુનસ્તે મમ નમઃ ॥ ૮॥

ઇતિ જ્ઞાત્વા સ્વામિન્નભયદ શરણ્યેશ શરણં
સમાયાતો દીનસ્તવ પદસરોજં દ્રુતમહં
અચિન્ત્યૈશ્વર્યાબ્ધે નિજબિરુદમાલોક્ય કરુણાં
વિધાય સ્વીયં તદ્ વરદ વરદાનં કુરુ ઋતમ્ ॥ ૯॥

ઇતિ શ્રીસ્વામિનારાયણબાપાચરિત્રામૃતસાગરે પ્રથમપ્રવાહે
ષષ્ઠે તરઙ્ગે ધર્મદેવકૃતા શ્રીહરિસ્તુતિઃ સમ્પૂર્ણા ।

*Dharmadevakrita Shri Hari Stuti*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*